अनुकम्पामृदुरेव श्रोत्रियः

त्रि. ना. धर्माधिकारी

प्राक् वेदोक्ते यज्ञे पशुहिंसाया विधानं दृश्यते। कालक्रमेण वर्णविशेषाभ्यां मांसाशनं निवृत्तम्। इदं तु साम्प्रतमेव। वेदेषु पशुयागे यद्यपि पशुहिंसा विहिता, तथापि सम्प्रति सा परिहर्तुं योग्या। तदैव श्रोत्रियस्य अनुकम्पामृदुत्वं सेत्स्यति। अत एव पशुयागे हिंसां कुर्वद्भिरपि ऋत्विग्भिः साक्षान्मांसभक्षणं विहाय आघ्राण-भक्षस्यैष पक्षः स्वीक्रियते इति लेखकः पशुहिंसां वारयति लेखेऽस्मिन् युक्तियुक्तम्।

गौतमधर्मसूत्रे (१.८.२७) 'अग्न्याधेयम् अग्निहोत्रं दर्शपूर्णमासौ आग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणी इति सप्त हविःसंस्थाः' इति निर्दिश्य निरूढपशुबन्धः हविःसंस्थात्वेन निर्दिष्टः।

सोमयागे सवनीयदिनात् पूर्वस्मिन्नहनि योऽग्नीषोमीयपशुयागो विहितः स निरूढपशुबन्धस्य प्रकृतिः। अतः वेदेषु मूलतः सोमयागाङ्गत्वेन विहितः पशुः, गच्छता कालेन सूत्रकारैः तत उद्धृत्य स्वतन्त्रतया हविःसंस्थात्वेन निर्दिष्टः इति दृढं सम्भावयामः।

यज्ञे पशुः हिंस्यः अथवा नेति विचार्यमाणे अत्र द्वयी गतिः। यूपच्छेदनाद्यारभ्य उपयड्होमपर्यन्तं पशुविधानं वेदे[१] विहितत्वात् वेदप्रामाण्यमङ्गीकुर्वद्भिः आस्तिकैः सोमयागे अथवा निरूढपशुबन्धे पशुः हिंस्य एव इत्युच्यते। तदपरे न सहन्ते। न च ते पशुहिंसां यज्ञे अनुजानन्ति। तत्र विचारः प्रस्तूयते। पशुयागे पशोः, प्राधान्येन अजस्य, मारणं नाम हिंसा, 'संज्ञपनम्' इति अभिजातप्रौढभाषया यदुच्यते तत् विधीयते। पशुमारणं नाम पशोः शरीरात् जीवस्य अपाकरणम्। मारणं नाम हिंसा। तद् हि दारुणं कर्म, प्राणवियोगापादकम्। तदपि श्रोत्रियैः श्रुतिषु बद्धश्रद्धैः निर्दयमनुष्ठीयते। तथापि हा हन्त, ते अनुकम्पामृदवः इति स्तूयन्ते। तदुक्तं महाकविना कनिष्ठिकाधिष्ठितेन पशुहिंसापक्षपातिना 'सहजं किल यत् विनिन्दितं न खलु तत्कर्म विवर्जनीयम्। पशुमारणकर्मदारुणः अनुकम्पामृदुरेव श्रोत्रियः' (शाकुन्तले षष्ठे अङ्के प्रथमः श्लोकः) इति।

तत्र ब्रूमः– प्रथितं हि महाकवेरस्य वाग्व्यवहारस्य व्यञ्जनाव्यापाराश्रयत्वम्। स हि अभिधामपेक्ष्य व्यञ्जनामेव उररीकरोति। तस्य व्यञ्जनाव्यापारेण वञ्चितोऽसि सुकुमारबुद्धिः तत्रभवान्। श्लोकस्यास्य आपाततः अभिधीयमानेऽर्थे कः खलु कालिदासकाव्यकलासु परिनिष्ठितधिषणः श्रद्दधीत। अन्यच्च वाक्यमिदं जालोद्गालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं क्रियमाणस्य पृथक्जनस्य भणितिः, यः किल जालात् पलायिते मत्स्ये धर्मो मे भविष्यतीति ब्रूते। तस्मिन् कः खलु विचारवान् श्रद्धास्यति? अन्यच्च, न हि यज्ञेऽपि पशुमारणं नाम श्रोत्रियस्य सहजं कर्म। तत्कर्मणि शमितुः अन्यस्यैव कस्यचित् अधिकृतत्वात्, अतः मन्यामहे यत् महाकविरयं आपाततः यज्ञे पशुमारणं समर्थयन्नपि तन्निन्दतीति। अतः व्याजस्तुतेरिदमुत्तममुदाहरणमिति प्रतीमः।

पुराणपङ्क्तिष्वपि यज्ञे पशुमारणं जुगुप्सितं प्रतीयते। तथा हि– पद्मपुराणे (१३.३.२९) निर्दिष्टं–

यज्ञं कृत्वा पशुं हत्वा कृत्वा रुधिरकर्दमम्।
यद्येवं गम्यते स्वर्गः, नरकः केन गम्यते॥ इति।

तत्रैव पुनर्व्याहृतम्–

नैतत् युक्तिसहं वाक्यं हिंसा धर्माय जायते इति। एष हि आस्तिकानामपि पुराणकर्तृणाम् अभिप्रायः। का तर्हि कथा नास्तिकानां वेदप्रामाण्यम् अनधिगन्तृणाम्। नास्तिकमूर्धन्यश्चारुवाक्चार्वाकस्तु–

निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिः यदीष्यते।
स्वपिता यजमानेन किं वा तत्र न हन्यते॥ इति निर्भीकं पप्रच्छ।

तैत्तिरीयसंहितायां (७.१.९.१) तैत्तिरीयब्राह्मणे (१.८.६.३), ताण्ड्यमहाब्राह्मणे च 'पशवो वै पुरोडशाः' इत्युक्ताा पुरोडाशस्य पशुपर्यायित्वं संसूचितम्। तैत्तिरीयब्राह्मणे (१.२.८.८) पुनः 'पशोर्वै प्रतिमा पुरोडाशः' इत्यनेनापि पुरोडाशस्यैव पशुत्वम् अङ्गीकृतम्। मैत्रायणीसंहितायां (४.३.६) च 'एते वै पशवो यद् व्रीहयश्च यवाश्च। यद् व्रीहिमयः पुरोडाशो भवति तैनैव पशुरालभ्यते' इति पशुपुरोडाशयोः पर्यायित्वं संसूचितम्। शतपथब्राह्मणेऽपि 'पशुर्वा एष आलभ्यते यत् पुरोडाशः' (१.२.३.२५) इत्युक्त्वा पशोः पुरोडाशस्य च ऐकात्म्यं निरदेशि। ऐतरेयब्राह्मणं च भवति 'स वा एष पशुरेवालभ्यते यत् पुरोडाशः। तस्य यानि किंशारूणि[२] तानि रोमाणि, ये तुषाः[२] सा त्वक् ये फलीकरणाः तदसृक् यत् पिष्टं किक्नासाः[२] तन्मांसं यत् किञ्चित्कंसारं तदस्थि। सर्वेषां वा एष पशूनां मेधेन यजते यः पुरोडाशेन यजते' (ऐ.ब्रा ९) इति। अयं ब्राह्मणनिर्देशः पुरोडाशयागेनापि पशुयागः सम्पन्नो भवतीति आचष्टे।

एवं स्थिते अल्पप्रयाससाध्यं पुरोडाशयागं परित्यज्य बहुकष्टसाध्ये हिंसात्मके अत एव दारुणे च पशुयागे किंकृतोऽयं निर्बन्धः?

नूनं नैते विधयः, अपि तु पुरोडाशस्तावकानि अर्थवादवाक्यान्येतानि। सत्यं, न वयमपि नैतान्यनर्थवादवाक्यानीति ब्रूमः। अथापि वेदवाक्यानां काचन साधीयसी व्यवस्था कल्पनीया भवति इति प्राप्यते एव। वेदवाक्यानां व्यवस्थां विधातुमेव मीमांसाशास्त्रं प्रवृत्तं किल?

तत्र विचार्यते– वेदेषु पशुयागविधानानि परिसंख्याविधित्वेन परिगणनीयानि अथवा अर्थवाक्यानाम् एतेषामाधारेण काचन अनुमितश्रुतिः कल्पनीयेति द्वयमायतति।

वसिष्ठस्मृतौ चतुर्थाध्याये उक्तम्– 'पितृदेवतातिथिपूजायां पशुं हिंस्यात्। मधुपर्के च यज्ञे च पितृदैवतकर्मणि। अत्रैव च पशुं हिंस्यात् नान्यथेत्यब्रवीन्मनुः। नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्। न च प्राणिवधः स्वर्ग्यः तस्माद्यागे वधोऽवधः। अथाऽपि ब्राह्मणाय राजन्याय वाऽभ्यागताय महोक्षं महाजं वा पचेत्। एवमातिथ्यं कुर्वन्ति' इति।

भागवतपुराणेऽपि (११.२१.२९-३०)- 'हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया। यजन्ते देवता यज्ञैः पितृभूतयतीन् खलाः'।। इति पशुहिंसां विनिन्द्य- 'हिंसायां यदि रागः स्यात् यज्ञ एव न चोदना'। इति यागे पश्वाहुतीनां परिसंख्याविधित्वं निर्दिष्टं, नापूर्वविधित्वमिति।

मनुस्मृतावपि (५.५६) 'न मांसभक्षणे दोषः न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला' इत्युक्तम्। तत्रैव मनुः, पुरुषाणां रागतः प्राप्तां मांस-भक्षणप्रवृत्तिमनुलक्ष्य तन्निवृत्त्यर्थं कांश्चन नियमानपि व्यदधात्। अन्ते च – 'मधुपर्के च यज्ञे च पितृदैवतकर्मणि। अत्रैव पशवो हिंस्याः नान्यत्रेत्यब्रवीन्मनुः' (५.४१) इत्याह। श्लोकोऽयं वसिष्ठस्मृतौ उद्धृतः इति इतः पूर्वं निर्दिष्टमेव।

'वृथा मांसं न भोक्तव्यं, भोक्तव्यं श्राद्धकर्मणि। अन्यथा भक्षणे विप्रः प्राजापत्यं समाचरेत्', इति छागलेयम्। एवं स्मृत्यादिषु श्राद्धादन्यत्र अन्यथा मांसभक्षणे प्रायश्चित्तं निर्दिशन्ति। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इत्यपि चामनन्ति वेदविदोऽपि।

एवं पुराणानि स्मृतयश्च पशुयागविधानं परिसंख्याविधित्वेन प्रायशः गणयन्ति। उभयस्य युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्येति मीमांसकैः गण्यते।

मांसभक्षणं हि यज्ञे पशुहिंसायां सत्यां प्राप्यते। लौकिकेऽपि तत् रागतः प्राप्यते। एवं मांसभक्षणम् उभयत्र प्राप्तं, यज्ञे लौकिके चेति, तत्र लौकिके

मांसभक्षणनिवृत्तिपरं यज्ञे पशुहिंसाविधानमिति भवत्यत्र परिसंख्याविधिः। एतावता यज्ञादन्यत्र पशुहिंसा न कर्तव्या, न च यज्ञादन्यत्र मांसभक्षणं विधेयम् इति निर्भ्रान्तं प्रतीयते।

रागतः प्राप्ता सहजा प्रवृत्तिः (instinct) दुष्करा भवति नियन्तुम्। पृथकजनानां कृते तस्याः सर्वथा त्यागः अनर्थानपि उत्पादयति। रागतः प्राप्तानां विषयाणाम् अनिर्बन्धं सेवनमपि भयावहतरं सम्पद्यते। एतादृश्यां शृङ्खापत्तौ श्रुतिमूलिकया स्मृत्या अनिष्टपरिहारकः उपायः प्रादर्शि– 'तस्माद्यज्ञे वधोऽवधः' इति। येन न्यूनतः यज्ञादन्यत्र पशुवधः तन्मांसभक्षणं निवार्येत इति। एतेन वेदानाम् इष्टप्राप्तिपूर्वक-अनिष्ट-परिहारस्य अलौकिकोपायप्रदर्शनत्वमपि सिध्यति।

एवं सत्यपि यज्ञे पशुहिंसाया निवारणं, परिसंख्याविध्याश्रयणात् न सम्भाव्यते एव। अथापि नैतावता पशुमारणकर्मदारुणत्वम् अनुकम्पाराहित्यं च सेत्स्यति श्रोत्रियाणाम्। तत्र विषये श्रौतं विचारं प्रदर्शयामः।

पशुबन्धे पशोः नियोजनाय यूपः खातो भवति। यूपनिर्माणार्थं वृक्षात् शाखाछेदनमावश्यकम्। अत्र जीवतः वृक्षस्य शाखाछेदनमपि हिंसामावहति। वृक्षशाखाछेदनप्रसङ्गे अध्वर्युः, छेदनात् पूर्वं मध्वा नाम मधुरेणाज्येन यूप्यं वृक्षं मूले पर्यणक्ति। ततश्च वृक्षशाखायां स्वधितिना प्रहारवेलायां स्वधितिं प्रार्थयते– 'हे स्वधिते मैनं हिंसीः' इति। शाखाछेदनात् अनन्तरम् अधः पतन्तीं शाखामामन्त्रयते 'दिवमग्रेण मा लेखीः, अन्तरिक्षं मध्येन मा हिंसीः, पृथिव्याः सम्भव' इति। अयमर्थः– हे छिन्नवृक्षशाखे, पतनसमये दिवं वा अन्तरिक्षं वा मा विदारीः इति। ततश्च वृक्षस्य आव्रश्चने नाम छिन्नप्रदेशे हिरण्यं निधाय तत्र आज्येनाभिजुहोति, प्रार्थयते च, 'हे वनस्पते त्वं शतवल्शं विरोह' इति। अयमंशः तैत्तिरीयश्रुतौ संहितायां (१.३.५, ६.३.३) विस्तरेण पठितोऽस्ति। स तत्रैव द्रष्टव्यः।

एतावता वृक्षस्य छेदनेऽपि यदि ऋत्विजां मनसि हिंसाकृताः वेदनाः आविर्भवन्ति, यदि च भूमौ वृक्षशाखापतनवेलायाम् आकाशस्यापि परिलेखनं मा भूदिति अन्तःक्वथितहृदयः सन् स प्रार्थयते, तदा कथं सः पशुहिंसाकर्मणि कठोरहृदयः सम्पद्येत? स सर्वथा भगवतीं श्रुतिमनुरुध्यैव पशुमारणदारुणं कर्म अनुतिष्ठतीति ज्ञेयम्। तत्र श्रुतौ श्रद्धां बद्ध्वैव श्रुतिविहितं कर्म अनुतिष्ठतीति ध्येयम्।

तैत्तिरीयसंहिताया: चतुर्थे काण्डे षष्ठे प्रपाठके सप्तमाद्यनुवाकत्रये अश्वमेधप्रकरणे अश्वस्तोमीयहोममन्त्राः पठ्यन्ते। अस्याः संहितायाः चतुर्थं काण्डं प्रायशः अग्निकाण्डम्। किन्तु अग्निप्रकरणे अश्वस्तोमीयानां सम्बन्धाभावात् तत उत्कृष्य अश्वमेधप्रकरणे तेषां सम्बन्धो द्रष्टव्यो भवति। तत्र नवमेऽनुवाके दशमो

मन्त्रस्तावत्– 'न वा उवेतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः। हरी ते युञ्जा पृषती अभूतामुपास्थात् वाजी धुरि रासभस्य' इत्येवं भवति। अत्र सायणीयं भाष्यम् अर्थानुसन्धानाय यथावद् उदाहरामः। 'हे पशो शास्त्रानभिज्ञानां लौकिकानां दृष्ट्या त्वमेतत् प्रत्यक्षं म्रियसे, शमितृभिः हिंस्यसे च। शास्त्रदृष्ट्या तु त्वं न वै उ म्रियसे, एतन्मरणमेव न भवति। न च रिष्यसि नापि शमितृभिः हिंस्यसे। किं तु पथिभिः सुगममार्गैः देवान् इद् एषि। देवानेव प्राप्नोषि' ... इत्येवमादि।

अयं मन्त्रः अश्वस्तोमीयासु ऋक्षु पठितः।

या एव अश्वमेधे संज्ञप्यमानस्य अश्वस्य स्थितिः सैव पशुबन्धे अजादीनां पशूनाम् इति भगवत्याः श्रुतेः आकूतमित्युत्पश्यामः।

अयमाशयः मन्त्रोऽयं संज्ञप्यमानस्य पशोः प्राणवियोगरूपं व्यापारं न ब्रूते, किन्तु 'अत्रैव प्राणाः समवलीयन्ते' इति न्यायेन योगरीत्या देवान् प्रति पशोः प्रस्थानम् अवगमयति इति। इदमत्रावधेयं यत् पशोः श्वासनिरोधेन प्राणवियोगः कार्यते, न शस्त्रेण इति।

अन्यच्च पशुयागे प्राधान्येन अजः पशुर्भवति। 'न जायते' इति व्युत्पत्त्या अजस्य अलक्ष्यजन्मता सिध्यति। कथं तर्हि अजातस्य प्राणवियोगः। नूनं विप्रतिषिद्धम् एतत् यदजातो म्रियते इति। उक्तं च 'जातस्य हि ध्रुवो मृत्युः', न ह्यजातस्य इति।

एतेन पशुमारणकर्मदारुणस्य श्रोत्रियस्य विषये यः पूर्वपक्ष अस्माभिः उपन्यस्तः स उपध्वस्तो वेदितव्यः। अन्यच्च न हि श्रोत्रिया ऋत्विजः पशून् संज्ञपयन्ति। तदर्थं शमिता नाम कश्चन अन्यः पुरुषः नियुक्तो भवति श्रौते कर्मणि इति इतः पूर्वमस्माभिर्निर्दिष्टमेव।

मैत्रायणी-संहितायां 'हविर्वै दीक्षितः' (३.६.२) इत्युक्त्वा पुनरपि तत् समर्थयते– 'यदा वै हविर्यजुषा प्रोक्षति अथ हविर्भवति। यद् यजुषा (यजमानं) स्नपयति हविरेवैनमकः' इति। पुनरपि संहितेयं (३.६.८) यजमानरूपस्य हविषः मेध्यत्वं होमं च प्रतिजानीते– 'यदास्य कृष्णं चक्षुषोर्नश्यति अथ मेध्यो भवति, कर्शयते आत्मानं तेनैवास्य तद्भुतं भवति' इति।

दीक्षाङ्गभूतोपवासादिना एकस्तनादिव्रतेन वा अङ्गकृशत्वसम्पादनमेव यजमानरूपस्य पशोर्होमः, न पुनः तदतिरिक्तस्य अजादेः पशोर्मारणमावश्यकमिति।

पुनरपि तैत्तिरीयसंहितायामुक्तम्– 'पुरा खलु वावैष मेधायात्मानमारभ्य चरति यो दीक्षितः। यदाग्नीषोमीयं पशुमालभते आत्मनिष्क्रयण एवास्य सः। तस्मात् तस्य नाऽऽश्यम्। पुरुष निष्क्रयण इव हि' (तै.सं ६.१.११) इति।

शतपथब्राह्मणेऽपि (११.७.३) 'आयुष्यो ह वा अस्यैष आत्मनिष्क्रयणो भवति। स यत् पशुबन्धेन यजते आत्मानमेवैतेन निष्क्रीणीते' इत्यादि। अत्र आपस्तम्बश्रौतसूत्रमपि[३] (७.२.८.५५) द्रष्टव्यम्।

एतावता अग्नीषोमीयादिपशुयज्ञे पश्वालम्भो हि यजमानस्य आत्मनिष्क्रयण इव। आत्मनः कृते पशुं मूल्यत्वेन अग्नीषोमाभ्यां दत्वा यजमानः आत्मानं निष्क्रीणीते। क्रयोऽयं किल ऐतरेयब्राह्मणस्थितां शुनःशेपस्य कथां स्मारयति।

यस्मादयं पशुः यजमानस्य मूल्यमिव तस्मात् तस्य पशोः सम्बन्धि हविः न भक्षणीयम्। तद्भक्षणे मूल्यनाशप्रसङ्गात्। अपि च स्वमांसभक्षणदोष इव तद् भवेत्।

अभिज्ञास्तु– यस्मात् अग्नीषोमीयार्थमिन्द्रो वृत्रं हतवान् तस्मात् अग्नीषोमीयपश्वालम्भः यजमानस्य वैरिघाती। तस्मात् तस्य हविर्भागः भक्षणीय एव इति।

एतेन यजमान एव मूलतः पशुत्वेन अनुमतः। तस्य मूल्यप्रदानेन क्रीतस्य अजादेः आलम्भनमत्र स्वीक्रियते।

एतावता 'स्वपिता यजमानेन किं वा तत्र न हन्यते' इत्याक्षेपोऽपि निरस्तः। यजमानपितुरपि अजादिमूल्यप्रदानेन निष्क्रेतुं शक्यत्वात्।

वस्तुगत्या तु पुरोडाशः न पशुः। किन्तु पर्यग्निकरणादिभिः व्यापारैः पशुत्वेनोपचरितः सन् पशुत्वेन स्वीकृतो ज्ञेयः। तथा चोक्तं तैत्तिरीये– 'त्वचं गृह्णीष्व इत्याह सर्वमेवैनं सतनुं करोति। पर्यग्निकरोति पशुमेवैननमकः' (तै.सं २.२.३) इति।

अन्यच्च पुरोडाशो हि व्रीहिभिर्यवैर्वा निष्पाद्यते। तत्रापि व्रीह्याद्यवघातेन बीजवधादिजनिता हिंसा प्रसज्यते एव। उक्तं च तैत्तिरीये– 'देवा वै हविर्भृत्वा अब्रुवन् कस्मिन्निदं म्रक्ष्यामहे' इत्यादि। अत्र सायणः– 'देवा पूर्वं व्रीह्यवघातादिना हविः सम्पाद्य बीजवधादिपापलेपः कस्मिन् पुरुषे मार्जनीयः इति विचार्य अन्ते ब्रह्मणि अमृजन्त' इति।

एतावता, यथा पशुयागे पशुमारणहिंसा दृश्यते तथा पुरोडाशयागेऽपि व्रीह्यादिबीजवधरूपा हिंसा अस्त्येवेति समानोऽयं तत्परिहारश्चापि। यथोच्यते– 'यश्चोभयोः समो दोषः परिहारोऽपि तत्समः' इति।

अद्यत्वे तु केचन आस्तिका अपि यजमानाः याज्ञिकाश्च पशुप्रयोगे पशोः अङ्गाद्याहुतिस्थाने आज्यानि जुह्वन्तः पिष्टपशोर्वा आलम्भनादि आचरन्तः दृश्यन्ते। तत्र किं तैः प्रत्यक्षपशुस्थाने आज्यादिहोमस्य अथवा पिष्टपशोः आलम्भनस्य कश्चिद् विधिः वेदेषु दुष्टचरः? नेति ब्रूमः। किन्तु एतादृशः विधिः उन्नेतुं शक्यः। न चेदं मीमांसाशास्त्रेण विरुध्यते।

तथा हि– तैत्तिरीयसंहितायां (७.१.१) 'य एवं विदानग्निष्टोमेन यजते प्रजाताः प्रजाः जनयति परिप्रजाता गृह्णाति तस्मात् ज्येष्ठयज्ञः, स ह्येतेनाग्रेऽयजत' इत्यत्र भाष्यं कुर्वन् भट्टभास्करः ब्रूते 'तस्मात् अग्निष्टोमेन यजेत इति विधिरनुमीयते' इति। अत्रैव सायणार्योऽपि– 'तदेवं विधेयस्य सोमयागसम्बन्धिनी ज्योतिष्टोमावयव-व्युत्पादनमुखेन विधेयार्थप्रशंसा सम्पादिता। इदानीं तद्विधिमुन्नयति यं कामं कामयते तमेतेनाभ्यश्नुते सर्वं ह्यस्थूरिणाऽभ्यश्नुते' इति। एतेन ज्योतिष्टोमेन सर्वकामानां प्राप्तुं शक्यत्वात् ज्योतिष्टोमं कुर्यादित्यभिप्रायः' इति।

एतावता विधेयार्थप्रशंसापरैः वाक्यैः तत्सूचितो विधिः उन्नेतुं शक्यते इति सिद्धत्वात् नात्रापि 'पशोः स्थाने पुरोडाशेन यजेत' इत्याद्युन्नीतविधेः न शास्त्रविरोधित्वं भवितुमर्हति।

अन्यदपि अनुमितविधेरुदाहरणं प्रदर्शयामः। तथाहि– जैमिनीयन्यायमालायां नवमाध्यायस्य चतुर्थपादे द्वितीयाधिकरणे सिद्धान्तत्वेनोक्तम्– 'निषेधः प्राप्तिपूर्वोऽतः प्रापकोऽत्रानुमीयते' इति। तत्र सायणीयं भाष्यम् (तै.सं ४.६.९) 'तस्मात् प्रसञ्ज-केनोपजीव्येन अनुमितविधिना' इत्यादि।

यदा किल अन्यत्र विधिः उन्नेतुं शक्यः तदा पशुप्रसङ्गे पुरोडाशस्तावकैः अर्थवादवाक्यैः 'पशुस्थाने पुरोडाशेन यजेत' इत्याकारस्य उन्नीतविधेः स्वीकारे कः खलु प्रत्यवायः स्यात्?।

अन्यच्च, बृहस्पति-स्मृतौ तु– 'केवलं शास्त्रमाश्रित्य न कर्तव्यो धर्मनिर्णयः। युक्तिहीने विचारे तु धर्महानिः प्रजायते' इत्युक्तम्।

अर्थशास्त्रे बार्हस्पत्यसूत्रं प्रधानं, तत्र 'धर्म्यमपि लोकविकृष्टं न कुर्यात्' (१.४) इति विहितम्। वस्तुतस्तु 'यद्यपि शुद्धं लोकविरुद्धं नाचरणीयम्' इत्युक्तेः निर्वाहश्चेत् करणीयः पशुबन्धे पशुस्थाने आज्यस्य पिष्टपशोर्वा आहुतिः प्रदेया।

बौधायनश्रौतसूत्रे (२३.५) एवमाम्नायते– 'यदि पशोरवदानं नश्येत् आज्यस्य प्रत्याख्यायमवद्येत्। तत्कृत्वा कृतमेव मन्येत' इति। अत्र पशोरवदाने नष्टे तत्स्थाने न पशुः पुनरपि हिंस्यः इत्याकूतम्। एतद्धि कियताऽप्यंशेन पशुस्थाने आज्याहुतिं समर्थयति।

यथा पशुयागे तन्मारणहिंसा दृश्यते तथैव पुरोडाशयागेऽपि व्रीह्यादिबीजवधरूपा हिंसा अस्त्येव। वेदैस्तावत् यूपच्छेदनप्रसङ्गे वनस्पतीनां हिंसाया अपि विचारः प्रस्तुतः इत्युक्तमेव प्राक्।

यज्ञाङ्गहिंसां प्रति एतादृश्य विप्रतिपत्तयः, प्रायेण ये एकस्मिन्निपि दिने मांसवर्जं भोजनं न भुञ्जते तैः शठैः उद्भाव्यन्ते। अपि च न केवलं वैदिकयज्ञीयविधिषु पशुहिंसा दृश्यते, अन्यत्राऽपि 'कुरबानी' संज्ञया पशुहिंसाया उदात्तीकरणं क्रियमाणं दृश्यते। तत्र सर्वधर्मसमभावः कुतो नाद्रियते? अथवा वेदेषु श्रद्धां शिथिलयितुमेवेमे प्रयासाः भवन्तीति शङ्कते नो मनः। अथापि वेदप्रतिपाद्याऽपि पशुहिंसा न करणीया इत्येव नः आशयः। यतो हि हिंसा गर्हिता भवति। तत्र आपस्तम्बधर्मसूत्रं (१.७.२०) निर्दिशति– 'यत् आर्याः क्रियमाणं प्रशंसन्ति स धर्मः, यद् गर्हन्ते सोऽधर्मः' इति। अस्मदीयम् आर्यं मनः एव यज्ञेऽपि पशुहिंसां नानुजानाति इत्यत्र नः अन्तःकरणप्रवृत्तिरेव प्रमाणम्। किं प्रमाणान्तरैः?

वस्तुतस्तु ऐतिह्याश्रयेण चेत् विचारः प्रवर्तितः तत्र इदमुत्प्रेक्षामः। वेदस्य कालविचारश्चेत् क्रियेत, स कालः अत्यन्तं प्राचीनः यदात्वे ब्राह्मणवैश्यावपि मांसनिवृत्तौ न आस्ताम्। रामायणे च प्रोक्तम्– 'यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः' इति। तदात्वे यज्ञे पशुहिंसाया विधानं वेदेषु दृश्यते। गच्छता कालेन संस्कृतौ प्रायशः द्वाभ्यां वर्णाभ्यां क्रमशः मांसभोजननिवृत्तिः स्वीकृता।

अन्यच्च पशुयागे पशुहिंसामपि कुर्वद्भिः ऋत्विग्भिः साक्षात् मांसभक्षणं न क्रियते, किन्तु अवघ्राणभक्षस्य पक्षः स्वीक्रियते। पशुयज्ञेऽपि मांसभक्षणनिवृतिः संस्कृतौ स्वागतमर्हति।

एवं च वेदेषु पशुयागे यद्यपि पशोर्हिंसा विहिता तथापि साम्प्रतिके काले सा परिहरणीया। तेनैव श्रोत्रियस्य अनुकम्पामृदुत्वं सेत्स्यति इति नः आकूतम्।

---

१. तैत्तिरीयसंहिता १.३.५–११, तैत्तिरीयसंहिता– ६.३.३–६.४.१)

२. सायण– किंशाखणि बुसपलालादीनि पशुरोमस्थानीयानि, तुषाः तण्डुलवेष्टनरूपाः प्रथमावघातेन परित्याज्याः सा तृणसमष्टिः, फलीकरणाः तण्डुलश्चैत्यार्थेन अवघातेन हेया अंशाः...किक्नसाः सूक्ष्मा पिण्डावयवाः।

३. आपश्रौ. सूत्रम् (७.२८.७) मांसीयन्ति ह वा अग्नयेऽजुह्वतो यजमानस्य। ते यजमानमेव ध्यायन्ति। यजमानं सङ्कल्पयन्ति। पचन्ति ह वा अन्येष्वग्निषु वृथा मांसम्। अथैतेषां नान्या मांसाशा विद्यते। यस्यो चैते भवन्ति तं ततो नानीजानं पशुना संवत्सरोऽतीयात्। आयुष्यो ह वा अस्यैष आत्मनिष्क्रयण इति वाजसनेयके भवति।